# श्रीसंक्षेपहरिनामामृतव्याकरणम्

# Śrī Saṃkṣepa Harināmāmṛta Vyākaraṇa

# The Shorter Grammar of the Nectar of Hari's Names

# Text Only

Version 0.2


श्रीजीवगोस्वामिविरचितम्

by

Śrī Jīva Gosvāmī


December 22, 2003

# Contents

**मङ्गलाचरणम्** v

**1 संज्ञ-सन्धि-प्रकरणम्** 1

1.1 अथ संज्ञा . . . . . . . . . . . . . . . . . . . . . . . . . . . . 2

1.2 सन्धि-प्रकरणम् . . . . . . . . . . . . . . . . . . . . . . . . . 6

1.2.1 सर्वेश्वरसन्धिः . . . . . . . . . . . . . . . . . . . . . . 6

1.2.2 विष्णुजनसन्धिः . . . . . . . . . . . . . . . . . . . . . 9

1.2.3 अथ विष्णुसर्गसन्धिः . . . . . . . . . . . . . . . . . . 11

**2 अथ विष्णुपद-प्रकरणम्** 13

2.1 अथ सर्वेश्वरान्ताः पुरुषोत्तमलिङ्गाः . . . . . . . . . . . . . . . . . . 14

2.2 अथ सर्वेश्वरान्ता लक्ष्मीलिङ्गाः . . . . . . . . . . . . . . . . . . . . 21

# मङ्गलाचरणम्

कृष्णमुपासितुमस्य स्रजमिव नामावलिं तनवै ।
त्वरितं वितरेदेषा तत्साहित्यादिजामोदम् ॥ 1 ॥

आहतजल्पितजटिलं दृष्ट्वा शब्दानुशासनस्तोमम् ।
हरिनामावलिवलितं व्याकरणं वैष्णवार्थमाचिन्मः ॥ 2 ॥

व्याकरणे मरुनीवृति जीवनलुब्धाः सदाघसंविग्नाः ।
हरिनामामृतम् एतत् पिबन्तु शतधावगाहन्ताम् ॥ 3 ॥

श्रीहरिं मधुरं नत्वा हरिनामामृतं रसम् ।
व्याकरणञ्च तद्भक्त्या पिबन्तु व्रजवासिनः ॥ 4 ॥

साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ॥
वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥ 5 ॥ (भाग्. 6.2.14)

# Chapter 1

# संज्ञ-सन्धि-प्रकरणम्

१ ।नारायणादुद्भूतोऽयं वर्णक्रमः ।
स्वराः, अचश्च ॥१ ॥

अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः ।

क ख ग घ ङ ।

च छ ज झ ञ ।

ट ठ ड ढ ण ।

त थ द ध न ।

प फ ब भ म ।

य र ल व श ष स ह क्ष ।

एते ’वर्णाः’ ’अक्षराणि’ ’अलः’ च ।

एषामुद्भवस्थानानि:

अ-आ-कवर्ग-ह-विसर्गाणां कण्ठः

इ-ई-चवर्ग-य-शानां तालु

उ-ऊ-पवर्गाणामोष्ठः

ऋ-ॠ-टवर्ग-र-षाणां मूर्द्धा

ऌ-ॡ-तवर्ग-ल-सानां दन्ताः

एदैतोः कण्ठतालू

ओदौतोः कण्ठोष्ठम्

वकारस्य दन्तोष्ठम्

अनुस्वारस्य शिरो नासिका वा इत्यादीनि ॥१ ॥

## 1.1 अथ संज्ञा

२ ।तत्रादौ चतुर्दश सर्वेश्वराः ।

स्वराः, अचश्च ॥२ ॥

३ ।दश दशावताराः ।

समानाः, अकश्च ॥३ ॥

४ ।तेषां द्वौ द्वावेकात्मकौ ।

सवर्णसंज्ञा च ॥४ ॥

५ ।पूर्वो वामनः ।

ह्रस्वाः, निर्ह्रस्वाश् च ॥५ ॥

६ ।परस्त्रिविक्रमः ।

दीर्घाश् च ॥ ६ ॥

७ । त्रिमात्रो महापुरुषः ।

प्लुत-संज्ञश्च ॥ ७ ॥

८ । अ-आ-वर्जिताः सर्वेश्वरा ईश्वराः ।

नामिनः, इचश् च ॥ ८ ॥

९ । दशावतारा ईशाः ।

इकश् च ॥ ९ ॥

१० । अ-आ-इ-ई-उ-ऊ अनन्ताः ।

अणश् च ॥ १० ॥

११ । इ-ई-उ-ऊ चतुःसनाः ।

इणश्च ॥ ११ ॥

१२ । उ-ऊ-ऋ-ॠ चतुर्भुजाः ।

उकश्च ॥ १२ ॥

१३ । ए-ऐ-ओ-औ चतुर्व्यूहाः ।

सन्ध्यक्षराणि, एचश्च । एते सर्वे त्रिविक्रमाः ॥ १३ ॥

१४ । अं इति विष्णुचक्रम् ।

अनुस्वारः, बिन्दुः, लवश्च ॥ १४ ॥

१५ । अँ इति विष्णुचापः ।

अनुनासिकश्च ॥ १५ ॥

१६ । अः इति विष्णुसर्गः ।

विसर्गः, विसर्जनियः, विसृष्टः, अभिनिष्टानश्च ॥ १६ ॥

१७ । कादयो विष्णुजनाः ।

व्यञ्जनानि हलश्च । क-ष-संयोगे तु क्षः ॥ १७ ॥

१८ । य-व-वर्जितास्तु बलाः ।

रलश्च ॥ १८ ॥

१९ । ते मान्ताः पञ्च पञ्च विष्णुवर्गाः ।

वर्गाश्च कु-चु-टु-तु-पु-नामानश्च ॥ १९ ॥

२० । ञ-वर्जितास्तु विष्णुगणाः ।

मयः ॥ २० ॥

२१ । क-च-ट-त-पा हरिकमलानि ।

प्रथमाश्चपश्च ॥ २१ ॥

२२ । ख-छ-ठ-थ-फा हरिखड्गाः ।

द्वितीयाश्छफश्च ॥ २२ ॥

२३ । ग-ज-ड-द-बा हरिगदाः ।

तृतीया जबश्च ॥ २३ ॥

२४ । घ-झ-ढ-ध-भा हरिघोषाः ।

चतुर्था झभश्च ॥ २४ ॥

२५ । ङ-ञ-ण-न-मा हरिवेणवः ।

पञ्चमा अनुनासिका ञमश्च ॥ २५ ॥

२६ । त एतद्वर्जिता विष्णुदासाः ।

झपश्च ॥ २६ ॥

२७ । य-र-ल-वा हरिमित्राणि ।

अन्तःस्था यणश्च ।एते सविष्णुचापा निर्विष्णुचापाश्च ॥ २७ ॥

२८ ।श-ष-स-हा हरिगोत्राणि ।

उष्मानः षिटः शलश्च ॥ २८ ॥

२९ ।श-ष-साः शौरयः ।

शरश्च ॥ २९ ॥

३० ।विष्णुदास-हरिगोत्राणि वैष्णवाः ।

धुटो झलश्च ॥ ३० ॥

३१ ।हरिगदा-हरिघोष-हरिवेणु-हरिमित्राणि हश्च गोपालाः ।

घोषवन्तो हशश्च ॥ ३१ ॥

३२ ।यादवा अन्ये ।

अघोषाः खरश्च ॥ ३२ ॥

३३ ।शौरिवर्जितास्तु सात्वताः ।

खपश्च ॥ ३३ ॥

३४ ।वर्णस्वरूपे रामः ।

अट् इट् अकार इत्यादि च ॥ ३४ ॥

३५ ।तदादिद्वये द्वयम् ।

अस्य लक्ष्मीनारायणवाचित्वाद्भगवन्नामता ॥ ३५ ॥

३६ ।आदेशो विरिञ्चिः ॥ ३६ ॥

३७ ।आगमो विष्णुः ॥ ३७ ॥

३८ । लोपो हरः ।

लुक् इत्यन्ये ॥ ३८ ॥

३९ । सूत्राणि षड्विधानि ।

संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणं ॥ इति ॥ ३९ ॥

अत्र नामकरणं संज्ञादि सम्पूर्णम् ।

## 1.2 सन्धि-प्रकरणम्

### 1.2.1 सर्वेश्वरसन्धिः

यदिदं सन्धिनिर्माणं वर्णानामारभे मुदा ।
तेन मे कृष्णपादाब्जे मनःसन्धिर्विधीयताम् ॥

सन्धिरेकपदे नित्यं नित्यं धातूपसर्गयोः ।
अनित्यं सूत्रनिदेशेऽन्यत्र चानित्यमिष्यते ॥

४० । दशावतार एकात्मके मिलित्वा त्रिविक्रमः ।

कृष्णाग्रे, राधागता, हरि हरीति, हरीहा, विष्णूदयः, विष्णूढा, नरभ्रातॄषिः, गमॢकारः ॥ ४० ॥

४१ । अद्वयमिद्वये ए ।

यादवेन्द्रः, गोकुलेशः, मथुरेशः ॥ ४१ ॥

४२ । उद्वये ओ ।

पुरुषोत्तमः, सुपर्णोढः, द्वारकोत्सवः ॥ ४२ ॥

## ४३ । ऋद्वये अर् ।

कृष्णर्धिः ॥ ४३ ॥

## ४४ । ऌद्वये अल् ।

यमुनल्कारायते ॥ ४४ ॥

## ४५ । एद्वये ऐ ।

कृष्णैकनाथः, कृष्णैश्वर्यम्, स्वैरम्, स्वैरी, स्वैरिणी च ॥ ४५ ॥

## ४६ । ओद्वये औ ।

कृष्णौदनम्, कृष्णौन्नत्यम्, प्रौढः, प्रौढिश्च ॥ ४६ ॥

## ४७ । इद्वयमेव यः सर्वेश्वरे ।

हर्यर्चनम्, हर्यासनम्, दध्युपेन्द्रस्य, रुक्मिण्येषा इत्यादि ॥ ४७ ॥

## ४८ । उद्वयं वः ।

मध्वरिः, विष्ण्वाश्रितः ॥ ४८ ॥

## ४९ । ऋद्वयम् रः ।

रामभ्रात्रुदयः, रामभ्रात्रैश्वर्यम् ॥ ४९ ॥

## ५० । ऌद्वयं लः ।

शक्लर्थः ॥ ५० ॥

## ५१ । ए अय्, ऐ आय् ।

कृष्णयुत्कर्षः, गोप्यायासनम् ॥ ५१ ॥

## ५२ । ओ अव्, औ आव् ।

विष्णविह, कृष्णावत्र ॥ ५२ ॥

५३ । ए-ओभ्यामस्य हरो विष्णुपदान्ते ।

हरेऽत्र, विष्णोऽत्र ॥ ५३ ॥

५४ । अयादीनां यवयोर्वा ।

कृष्ण उत्कर्षः, यमुनाया अर्घः, गोप्या आसनम्, विष्ण इह, कृष्णा अत्र ॥ ५४ ॥

५५ । ओरामान्तानामनन्तानां चाव्ययानां सर्वेश्वरे न सन्धिः ।

नो उपेन्द्रः ॥ ५५ ॥

५६ । अदसोऽमीत्यस्य ।

अमी अच्युतप्रियाः ॥ ५६ ॥

५७ । महापुरुषस्य च ।

दुराह्वानादौ यत्नविशेषे वाक्यस्यान्ते सम्बोधनपदस्य संसारो महापुरुषः ; प्लुतसंज्ञश्च ॥ ५७ ॥

५८ । अन्त्यसर्वेश्वरादिवर्णाः संसारसंज्ञाः ।

आगच्छ हरे३, तिष्ठ हरे३ ॥ ५८ ॥

५९ । विचारे पूर्ववाक्यस्य संसारः ।

तमालो नु३, कृष्णो नु ॥ ५९ ॥

६० ।

पूर्वार्धस्य त्वरामः स्यादिदुतावुत्तरस्य हि ।
विभक्तावयवात्तस्माच्छरामो द्विर्भवत्युत ॥

हरे + छत्रम् + एतत् + ते = हरा३ इच्छत्रमेतत्ते? पटो + छत्रम् = पटा३ उच्छत्रमित्यपि ॥ ६० ॥

अद्येव, हलीशा, प्राच्र्छति, ऋणार्ण, गोऽग्रं, गवेन्द्र इत्यादयस्त्वाख्यातसमासयोर्वक्ष्यन्ते दुर्गमत्वात् ।

### 1.2.2 विष्णुजनसन्धिः

## ६१ । विष्णुदासो विष्णुपदान्ते हरिघोषे च हरिगदा ।

वागच्युतस्य, वाग्गोविन्दस्य, षड्गोपिका, भगवदिच्छा, ककुब्विष्णोः ॥ ६१ ॥

## ६२ । हरिवेणौ हरिवेणुर्वा ।

जगन्नाथः, जगद्नाथ इत्यादि ॥ ६२ ॥

## ६३ । यादवमात्रे हरिकमलम् ।

वाङ्कृष्णस्य ॥ ६३ ॥

## ६४ । ततः शश्छो वा ।

सुवाक्छौरिर्वा ॥ ६४ ॥

## ६५ । हो हरिघोषः ।

वाग् घरेः, वाग् हरेः इत्यादि ॥ ६५ ॥

## ६६ । दतौ परवर्णौ ल-च-टवर्गेषु नित्यम् ।

तल्लक्ष्मीपतेः इत्यादि ॥ ६६ ॥

## ६७ । तश्च शे ।

तच् शौरेः ॥ ६७ ॥

६८ । नोऽन्तश्चछयोः शरामः, टठयोः षरामः, तथयोः सरामः, विष्णुचक्रपूर्वो विष्णुचापपूर्वो वा ।

भगवांश्चलति, भगवांश्छादयति, भगवांष्टीकते, भगवांष्ठक्कुरः, भगवांस्तरति, भगवांस्थूत्करोति ॥ ६८ ॥

६९ । शे चान्तो वा ।

भगवाञ्च् शूरः, भगवाञ् शूरः, भगवाञ्च् छूरः ॥ ६९ ॥

७० । मो विष्णुचक्रं विष्णुजने ।

कृष्णम् + स्मरति = कृष्णं स्मरति ॥ ७० ॥

७१ । विष्णुचक्रस्य हरिवेणुर्विष्णुवर्गे विष्णुपदान्तस्य तु वा ।

कृष्णङ्कीर्तयति, कृष्णम्भजति वा । वर्गादन्यत्र न — संवत्सरः ॥ ७१ ॥

७२ । द्विः सर्वेश्वरमात्राच्छः ।

कृष्ण + छत्रम् = कृष्णच्छत्रम् ॥ ७२ ॥

७३ । आङ्माङ्भ्यां नित्यम् ।

आच्छादयति, माच्छिदत्, ॥ ७३ ॥

७४ । वामनात् ङणना द्विः सर्वेश्वरे ।

पर्यङ्ङनन्तः, सुगण्णनन्तः, कुर्वन्नस्ति ॥ ७४ ॥

७५ । विष्णुजने विष्णुजनो वा, ह-रौ विना ।

दध्य्युपेन्द्रस्य, दद्ध्युपेन्द्रस्य वा ॥ ७५ ॥

७६ । ररामात् सर्वेश्वरे तु हरिगोत्रं विना ।

हर्य्यासनं हर्यासनं वा; कार्ष्ण्यं कार्ष्णं वा ॥ ७६ ॥

७७ । विष्णुजनाद्विष्णुदास्यादर्शनं सवर्गे विष्णुदासे ।

भगवाञ्छूरः, भगवाञ्छ्रो वा ॥ ७७ ॥

७८ । सरामे टनाभ्यं तुग्वेति वक्तव्यम् ।

षट् + साधवः = षट्त्साधवः , भगवान् + साधुः = भगवान्त्साधुः ॥ ७८ ॥

इति विष्णुजनसन्धिः

### 1.2.3 अथ विष्णुसर्गसन्धिः

७९ । विष्णुसर्गः पफयोरुपध्मानीयः, कखयोर्जिह्वामूलीयो वा ।

कृष्णः फलम्, कृष्ण ᳵ फलं वा, कृष्णः परमः, कृष्ण ᳵ परमो वा । कः कृष्णः, क ᳵ कृष्णः, कृष्णः खेलति, कृष्ण ᳵ खेलति वा इत्यादि ॥ ७९ ॥

८० । चछयोः शरामष्टठयोः षरामस्तथयोः सरामः ।

कृष्णश्चरति, कृष्णश्छादयति, कृष्णष्टीकते, कष्ठरामः, कृष्णस्तरति, कृष्णस्थूत्करोति ॥ ८० ॥

८१ । शौरिषु शौरिर्वा ।

कृष्णश् शरणम्, कृष्णष् षण्डो, हरेस् सुरभिर्वा ॥ ८१ ॥

८२ । आदरामगोपालयोरुर्नित्यम् ।

कृष्णोऽत्र, कृष्णो गच्छति ॥ ८२ ॥

**८३ । अद्वय-भो-भगो-अघोभ्यो लोप्यः, सर्वेश्वरे तु यश्च, न च लोप्ये सन्धिः ।**

कृष्ण इह, कृष्णयिह वा; कृष्णा अत्र, कृष्णायत्र वा; भो अनन्त, भोयनन्त वा; भगो अनन्त, भगोयनन्त वा; अघो अवैष्णव, अघोयवैष्णव वा ॥ ८३ ॥

**८४ । र ईश्वरात् सर्वेश्वरगोपालयोः ।**

हरेरिदम्, हरिर्गच्छति ॥ ८४ ॥

**८५ । अह्नो विष्णुसर्गस्य रो रात्रि-रूपरथान्तरादन्येषु ।**

अहरहः, अहर्गणः; नेह — अहःपतिः ॥ ८५ ॥

**८६ । रो रे लोप्यः पूर्वश्च त्रिविक्रमः ।**

भ्रातः रामानुजं पश्य = भ्राता रामानुजं पश्य; हरिः राधाप्रियः = हरी राधाप्रियः ॥ ८६ ॥

इति विष्णुसर्ग-सन्धिः ॥

इति श्रीश्रीसंक्षेप-हरिनामामृताख्य-वैष्णवव्याकरणे

संज्ञा-सन्धि-प्रकरणं प्रथमं समाप्तम् ॥ १ ॥

# Chapter 2

# अथ विष्णुपद-प्रकरणम्

य एकः सर्वरूपाणां सर्वनाम्नां तथाश्रयः ।
तस्य विष्णोः पदं सर्वं विष्णुभक्त्या निरूप्यते ॥

१ ।अधातु-विष्णुभक्तिकमर्थवन्नाम ।

भू-सनन्ताद्या धातवः; स्वादि-तिवाद्या विष्णुभक्तयः ॥१ ॥

२ ।प्रकृतिः पूर्वा ।

सा च नाम-धातु-भेदाद्विविधा ॥२ ॥

३ ।प्रत्ययः परः ।

स च स्वाद्याख्यात-कृत्तद्धितभेदाच्चतुर्विधः ॥३ ॥

४ ।तत्र नाम्नः सुँ औ जस् (प्रथमा),
अम् औ शस् (द्वितीया),
टा भ्याम् भिस् (तृतीया),
ङे भ्याम् भ्यस् (चतुर्थी),

ङसि भ्याम् भ्यस् (पञ्चमी),
ङस् ओस् आम् (षष्ठी),
ङि ओस् सुप् (सप्तमी) ।

५ ।तत्र ज-ट-श-पा इतः, उँश्च सौँः, ङसेरिश्च ।

एति गच्छति न तिष्ठतीति इत्, अनुबन्धश्च ॥ ५ ॥

६ ।नामसंज्ञश्चतुर्विधः ।

यथा पुंलिङ्गः पुरुषोत्तमः; स्त्रीलिङ्गो लक्ष्मीः; नपुंसकलिङ्गो ब्रह्म-संज्ञः; अलिङ्गोऽव्ययः ॥ ६ ॥

## 2.1 अथ सर्वेश्वरान्ताः पुरुषोत्तमलिङ्गाः

तत्र प्रथमा कृष्ण-सुँ —

७ ।स-र-रामयोर्विष्णुसर्गो विष्णुपदान्ते ।

कृष्णः, एवं कृष्णौ, कृष्णाः ॥ ७ ॥

८ ।दशावतारादम्शसोररामहरः ।

कृष्णम्, कृष्णौ ॥ ८ ॥

९ ।दशावतारस्य त्रिविक्रमः शसि तस्मात् सो नः पुंसि ।

कृष्णान् ॥ ९ ॥

१० ।अरामान्तः कृष्णसंज्ञः ।

११ ।कृष्णात् टा इनः ।

कृष्णेन ॥ ११ ॥

१२ । कृष्णस्य त्रिविक्रमो गोपाले ।

कृष्णाभ्याम् ॥ १२ ॥

१३ । कृष्णाङ्भिस् ऐस् ।

कृष्णैः ॥ १३ ॥

१४ । कृष्णात् ङेर्यः ।

कृष्णाय, कृष्णाभ्याम् ॥ १४ ॥

१५ । कृष्णस्य ए वैष्णवे बहुत्वे ।

कृष्णेभ्यः ॥ १५ ॥

१६ । कृष्णात् ङसेरात् ।

कृष्णात्, कृष्णाभ्याम्, कृष्णेभ्यः ॥ १६ ॥

१७ । कृष्णात् ङसः स्य ।

कृष्णस्य ॥ १७ ॥

१८ । कृष्णस्य ए ओसि ।

कृष्णयोः ॥ १८ ॥

१९ । वामन-गोपी-राधाभ्यो नुडामि ।

उटावितौ ॥ १९ ॥

२० । वामनस्य त्रिविक्रमो नामि, नृ-शब्दस्य तु वा, न तिसृ-चतस्रोः ।

कृष्णानाम्, कृष्णे, कृष्णयोः ॥ २० ॥

२१ । ईश्वर-हरिमित्र-कङेभ्यो प्रत्यय-विरिञ्चि-सस्य षो,

नुम-विष्णुसर्ग-व्यवधानेऽपि, न तु विष्णुपदाद्यन्त-सातीनाम् ।

कृष्णेषु ॥ २१ ॥

२२ ।सम्बोधने सुर्बुद्धसंज्ञः ।

सम्बुद्धिश्च ॥ २२ ॥

२३ ।ए-ओ-वामनेभ्यो बुद्धस्यादर्शनम् ।

हे कृष्ण, हे कृष्णौ, हे कृष्णाः ।एवं रामः, रामौ, रामाः; रामम्, रामावित्यादि ॥ २३ ॥

२४ ।र-ष-ऋद्वयेभ्यो नस्य णः, सर्वेश्वर-ह-य-व-क-वर्ग-पवर्ग-व्यवधानेऽपि, समान-विष्णुपदे, न तु विष्णुपदान्तस्य ।

रामान्, रामेण, इत्यादि ।एवं केशव-नारायण-माधव-गोविन्दादयः कृष्णतुल्याः ॥ २४ ॥

२५ ।शसादयो यदु-संज्ञाः ॥ २५ ॥

२६ ।अत्र पाद-दन्त-मास-युष इत्येतेषां पद्-दत्-मास्-यूषन् इत्येते विरिञ्चियो यदुषु वा ।

पदः पादान्, पदा पादेन इत्यादि ॥ २६ ॥

अथ धातुस्वरूप आरामान्तो विश्वपाशब्दः ।

विश्वपाः, विश्वपौ, विश्वपाः;

विश्वपाम्, विश्वपौ ॥

२७ ।आरामहरो यदुसर्वेश्वरे, न त्वापः ।

विश्वपः;

विश्वपा, विश्वपाभ्याम्, विश्वपाभिः;

विश्वपे, विश्वपाभ्याम्, विश्वपाभ्यः;

विश्वपः, विश्वपाभ्याम्, विश्वपाभ्यः;

विश्वपः, विश्वपोः, विश्वपाम्;

विश्वपि, विश्वपोः, विश्वपासु;

हे विश्वपाः इत्यादि ।

हाहादीनामारामहरविधिर्वा ॥ २७ ॥

## २८ । इ-उ-रामान्तो हरिसंज्ञः ।

अग्निः, घिः, च । हरिः ॥ २८ ॥

## २९ । हरित औ पूर्वसवर्णः ।

हरी ॥ २९ ॥

## ३० । इद्वयस्य ए, उद्वयस्य ओ, ऋद्वयस्य अर्, ऌद्वयस्य अल् गोविन्द-संज्ञः ।

गुण-संज्ञश्च ॥ ३० ॥

## ३१ । ङितो वृष्णिसंज्ञाः ॥ ३१ ॥

## ३२ । हरेर्गोविन्दो जसि वृष्णिषु बुद्धे च ।

हरयः;

हरिम्, हरी, हरीन् ॥ ३२ ॥

## ३३ । हरितष्टा ना, न तु लक्ष्म्याम् ।

हरिणा, हरिभ्याम्, हरिभिः;

हरये, हरिभ्याम्, हरिभ्यः ॥ ३३ ॥

## ३४ । ए-ओभ्यां ङसि-ङसोररामहरः ।

हरेः, हरिभ्याम्, हरिभ्यः;
हरेः, हर्योः, हरीणाम् ॥ ३४ ॥

## ३५ । हरितः ङेरौच् ।

चराम इत् ॥ ३५ ॥

## ३६ । अन्त्यसर्वेश्वरादिवर्णाः संसारसंज्ञाः ।

## ३७ । संसारस्य हरश्चिति ।

डित् इति प्राञ्चः । हरौ, हर्योः, हरिषु;
हे हरे । एवं रवि-कव्यादयः । त्रिशब्दो नित्यबहुवचनान्तः । त्रयः, त्रीन्, त्रिभिः;
त्रिभ्यः, त्रिभ्यः ॥ ३७ ॥

## ३८ । त्रेस्त्रयो नामि स्वार्थे ।

त्रयाणाम् । अस्वार्थे तु प्रियत्रीणाम् । एवं कति-यति-ततीनाम् ॥ ३८ ॥

## ३९ । षणान्त-सङ्ख्यातः कतेश्च जस्-शसोर्महाहरः स्वार्थे ॥ ३९ ॥

अथ सखिशब्दः

## ४० । ऋराम-सखिभ्यां सोराच्, बुद्धं विना ।

संसारस्य हरः — सखा ॥ ४० ॥

## ४२ । स्वादयः पञ्च पाण्डवाः ।

घुटः, सुटश्च ॥ ४२ ॥

## ४४ । न सखिर्हरिसंज्ञष्टादौ, पतिस्त्वसमासे ।

सख्या, [सखिभ्याम्, सखिभिः;] ॥ ४४ ॥

## ४५ । ख्य-त्य-भ्यां ङसि-ङसोरुस् ।

सख्युः, [सखिभ्याम्, सखिभ्यः;
सख्युः, सखिभ्याम्, सखिभ्यः;] । ४५ ॥

## ४६ । सखिपतिभ्यां ङेरौ ।

सख्यौ, [सख्योः, सखिषु;] हे सखे इत्यादि ॥ ४६ ॥

ईरामान्तो दैत्यप्रमी-शब्दः । दैत्यान् प्रमीनाति हिनस्तीति क्विबन्तो विष्णुवाची । दैत्यप्रमीः इत्यादि सुगमम् । उरामान्त-विष्णुशब्दः हरिसूत्रैरेव साधनम्; विष्णुः, विष्णू, विष्णवः इत्यादि ।

कृष्णश्रीः —

## ४७ । धातोरीदूतोरियुवौ सर्वेश्वरे बहुलम् ।

कृष्णश्रियौ, कृष्णश्रियः इत्यादि । भावे क्विपि भूः, भुवौ, भुवः इत्यादि । विश्वनीः, विश्वन्यौ विश्वनियौ, विश्वन्यः विश्वनयः इत्यादि । षष्टीबहुत्वे विश्वन्यां विश्वनियाम् ॥ ४७ ॥

## ४८ । नीराधाभ्यां ङेराम् ।

विश्वन्याम् ॥ ४८ ॥

अथ ऋरामान्ताः ; तत्र पितृ-शब्दः ; पिता —

## ४९ । ऋरामस्य गोविन्दः पाण्डवेषु ङौ च ।

पितरौ, पितरः इत्यादि । पितॄन्, पित्रा, पितृभ्याम्, पितृभिः इत्यादि ॥ ४९ ॥

५० । ऋरामतो ङसिङसोरस्य उच् ।

पितुः इत्यादि ॥ ५० ॥

५१ । बुद्धे गोविन्दः ॥ ५१ ॥

५२ । राधाविष्णुजनाभ्यामीपश्च त्रिविक्रमात् सोर्हरः ।

हे पितः । नृ-शब्दः — ना, नरौ, नरः । षष्टी — नृणां, नॄणाम् । हे नः ॥ ५२ ॥

कृष्णरै-शब्दः —

५३ । राय आ स-भोः ।

कृष्णराः, कृष्णरायौ, कृष्णरायः इत्यादि ॥ ५३ ॥

गो-शब्दः —

५४ । ओ औ पाण्डवेषु ।

गौः, गावौ, गावः ॥ ५४ ॥

५५ । ओ आ अम्-शसोर्न च सो नः ।

गाम्, गावौ, गाः; गवा, गोभ्यामित्यादि । हे गौः । एवं ग्लौः, ग्लावौ, ग्लावः इत्यादि । हे ग्लौः ॥ ५५ ॥

इति सर्वेश्वान्ताः पुरुषोत्तमलिङ्गाः ।

## 2.2 अथ सर्वेश्वरान्ता लक्ष्मीलिङ्गाः

५६ । आरामान्तलक्ष्मी राधासंज्ञा ।
श्रद्धासंज्ञा च। तत्र राधाशब्दः। राधा॥ ५६॥

५७ । राधाब्रह्मभ्यामौ ई।
राधे, राधाः,
[राधाम्, राधे, राधाः]॥ ५७॥

५८ । राधाया ए टौसोर्बुद्धे च।
राधया, राधाभ्याम्, राधाभिः॥ ५८॥

५९ । राधातो याप् वृष्णिषु।
राधायै, राधाभ्याम्, राधाभ्यः
राधायाः, राधाभ्याम्, राधाभ्यः
राधायाः, राधयोः, राधानाम्।
लाक्षणकान्न नुट् — राधायाम्, राधयोः, राधासु।
हे राधे इत्यादि। एवं रमारामाश्रद्धाम्बादयश्च॥ ५९॥

६० । अम्बादीनां गोप्याश्च वामनो बुद्धेः।
हे अम्ब॥ ६०॥

६१ । जराया जरस् वा सर्वेश्वरे।
जरा, जरसौ जरे, जरसः जराः
जरसम् जरामित्यादि। एवं निर्जरशब्दोऽपि विकल्प्यते॥ ६१॥

इरामान्तो भक्तिशब्दो पाण्डवेषु हरिशब्दवत् शसि भक्तीः
भक्त्या इत्यादि।

### ६२ । हरित आप् वा वृष्णिषु लक्ष्म्यां, नित्यं गोप्याः ।

भक्त्यै भक्तये (चतुर्थी) ;
भक्त्याः भक्तेः (पञ्चमी) ;
भक्त्याः भक्तेः, भक्त्योः भक्तीनाम् (षष्ठी) ;
भक्त्यां भक्तौ, भक्त्योः भक्तिषु (सप्तमी) ;
हे भक्ते

एवं बुद्धि-मति-धृति-प्रभृतयः ।

अथ धेनुशब्दः

धेनुः, धेनू, धेनवः ;
धेनुं, धेनू, धेनूः इत्यादि । वृष्णिषु वा —
धेन्वै धेनवे ;
धेन्वाः धेनोः ;
धेन्वां धेनौ ;
हे धेनो ॥ ६२॥

### ६३ । लक्ष्मीस्थयोस्त्रिचतुरोस्तिसृचतसृ विष्णुभक्तौ ।

### ६४ । तिसृचतस्रो रः सर्वेश्वरे ।

तिस्रः, तिस्रः, तिसृभिः, तिसृभ्यः, तिसृभ्यः, तिसृणां, तिसृषु॥
६३-६४॥

ईरामान्तो गोपीशब्दः —

### ६५ । ई-ऊ-लक्ष्मीर्गोपीसंज्ञा ।

नदीसंज्ञा च ।

गोपी, गोप्यौ, गोप्यः ;
गोपीं, गोप्यौ, गोपीः ;
गोप्या, गोपीभ्यामित्यादि। ङौ गोप्याम्; हे गोपि! एवं नदी-मही-प्रभृतयः।

सखी च सखी सख्यौ सख्यः। ङौ सख्याम्। त्रिविक्रमान्न सोर्हरः अतिगोपिः।

### अवी-तन्त्री-तरी-लक्ष्मी-ह्री-धी-श्रीणामुणादिना।
### शब्दानान्तु भवत्येषां सुलोपो न कदाचन॥

लक्ष्मीः, लक्ष्म्यौ, लक्ष्म्यः ;
लक्ष्मीमित्यादि गोपीवत्॥ ६५॥

स्त्रीशब्द ईवन्तोऽतः सोर्हरः —

स्त्री

### ६६। स्त्रीभ्रुवोरियुवौ सर्वेश्वरे स्त्रिया अम्शसोर्वा।

स्त्रियौ, स्त्रियः ;
स्त्रियं स्त्रीम्, स्त्रियौ, स्त्रियः स्त्रीः ;
स्त्रिया, स्त्रीभ्यां, स्त्रीभिः ;
स्त्रियै, स्त्रीभ्यां, स्त्रीभ्यः ;
स्त्रियाः, स्त्रीभ्यां, स्त्रीभ्यः ;
स्त्रियाः, स्त्रियोः, स्त्रीणाम् ;
स्त्रियां, स्त्रियोः, स्त्रीषु।
हे स्त्रि ॥ ६६॥

श्रीशब्दः —

श्रीः, श्रियौ, श्रियः ;
श्रियं, श्रियौ, श्रियः।

## ६७। नेयुव्स्थानं गोपी स्त्रियं विना वृष्णिष्वामि च वा।

श्रिया, श्रीभ्यां, श्रीभिः ;
श्रियै श्रिये, श्रीभ्यां, श्रीभ्यः ;
श्रियाः, श्रियः ... ;
श्रियाः स्त्रियः, श्रियोः, श्रीणां ;
श्रियां श्रियि, श्रियोः, श्रीषु ;
हे श्रीः॥

एवं भ्रूधीप्रभृतयः
भ्रूः, भ्रुवौ, भ्रुवः ;
भ्रुवमित्यादि।

प्रकृष्टा धी — प्रधीः, प्रधियौ, प्रधियः;
ङे — प्रधियै प्रधिये, प्रधीभ्यामित्यादि।

वधूप्रभृतीनां लक्ष्मीशब्दवत् —
वधूः, वध्वौ, वध्वः ;
हे वधु

मातृशब्दः पितृशब्दवत्, शसि तु मातृः।

रैशब्दः स्त्रियामपीति क्षीरस्वामी तेन पूर्ववत्।

गोशब्दः पूर्ववत्। द्योशब्दो गोवत्। नौशब्दो ग्लौवत्॥ ६७॥

इति सर्वेश्वरान्ताः लक्ष्मीलिङ्गः ।